# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा - तत्त्वाचार्यः (SEM-1) | **प्रश्नपत्रम् – २** | गुणाः - ७० |
| विषयः - साहित्यम् | ग्रन्थः काव्यानुशासनम् | |
| दिनाङ्कः - ०५/१२/२०१८ | | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः -१ निम्नलिखितयोः एकं व्याख्यायत ।** ०५

(१) *अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम्।*
*सर्वभाषापरिणतां जैनीं वाचमुपास्महे॥*

(२) *शब्दानुशासनेऽस्माभिः साध्व्यो वाचो विवेचिताः।*
*तासामिदानीं काव्यत्वं यथावदनुशिष्यते॥*

**प्रश्नः -२** *आचार्यहेमचन्द्रस्य परिचयं लिखत।* १०

**अथवा**

*काव्यानुशासनस्य वैशिष्ट्यं लिखत।*

**द्वितीयान्वितिः**

**प्रश्नः -३ अधोलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** ०५

१ *रसादेः स्वशब्दोक्तिः क्वचित् संचारिवर्जं दोषः।*

२ *निरर्थकासाधुत्वे पदस्य।*

**प्रश्नः -४** *हेमचन्द्रानुसारं रसदोषान् वर्णयत।* १०

**( अथवा )**

*माधुर्यादीन् गुणान् प्रतिपादयत।*

**तृतीयान्वितिः**

**प्रश्नः -५ निम्नलिखतयोः एकं ससन्दर्भं व्याख्यायत ।** ०५

१ *सत्यर्थेऽन्यार्थानां वर्णानां श्रुतिक्रमैक्ये यमकम्।*

२ *असद्धर्मसम्भावनमिवादिद्योत्योत्प्रेक्षा।*

**प्रश्नः -६** *अनुप्रासं सभेदं वर्णयत।* १०

**(अथवा )**

*उपमालङ्कारः यथाग्रन्थं प्रतिपाद्यताम्।*

## चतुर्थान्वितिः

**प्रश्नः -७ अधोलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** ०५

*१ समग्रगुणः कथाव्यापी नायकः।*

*२ श्रव्यं महाकाव्यमाख्यायिका कथा चम्पूरनिबद्धं च।*

**प्रश्नः -८** *नायकस्य सात्त्विकगुणान् वर्णयत।* १०

**(अथवा )**

*काव्यस्य दृश्यभेदाः प्रतिपादनीयाः।*

**प्रश्नः -९ अधोलिखितेभ्यः दशप्रश्नाः समाधेयाः ।** १०

*१ आचार्यहेमचन्द्रस्य उपाधिः कः?*

*२ आचार्यहेमचन्द्रः कस्य राज्ञः सभापण्डितः आसीत् ?*

*३ काव्यानुशासने कति अध्यायाः सन्ति ?*

*४ काव्यानुशासने कति सूत्राणि सन्ति ?*

*५ काव्यानुशासनस्य स्वोपज्ञवृत्तेः नाम किम् ?*

*६ कस्मिन् अध्याये रसनिरुपणम् अस्ति ?*

*७ हेमचन्द्रानुसारं कति शब्दालङ्काराः?*

*८ वीररसस्य कति भेदाः ? के च ते ?*

*९ मध्यमकाव्यस्य कति भेदाः सन्ति ?*

*१० दोषनिरुपणं कस्मिन् अध्याये वर्तते ?*

*११ कस्मिन् गुणे मृदुरचना भवति ?*

*१२ अर्थालङ्कार निरुपणं कस्मिन् अध्याये वर्तते ?*

*१३ नायकस्य कति भेदाः भवन्ति ?*

*१४ नायिकायाः कति अवस्थाः सम्भवन्ति ?*

*१५ कस्मिन् प्रकारके काव्ये रूपकाणां समावेशः भवति ?*

--००--